# Rishi Agastyaproktam Shivarchanopadesham 5

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૫

## Document Information

Text title : Rishi Agastyaproktam Shivarchanopadesham 5

File name : shivArchanopadeshamagastyaproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 473-488||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 21, 2024

*sanskritdocuments.org*

Rishi Agastyaproktam Shivarchanopadesham 5

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૫

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

- ઋષ્યગસ્ત્યવિપ્રસંવાદે -

(અતઃ) શિવાર્ચનેનૈવ દુઃખનાશો ભવિષ્યતિ ।
શિવાર્ચનં વિના વિપ્રા દુઃખનાશો ન જાયતે ॥ ૪૭૩॥

સંસારબન્ધવિચ્છેદો ન શિવરાધનં વિના ।
યસ્ય લીલાવિહારોઽયં પ્રપઞ્ચો દ્વિવિધો દ્વિજાઃ ॥ ૪૭૪॥

તસ્ય શ્રીવિશ્વનાથસ્ય પૂજા દુઃખાપહારિણી ।
વિશ્વસ્ય પાર્વતીનાથો યષ્ટવ્યશ્ચ મુમુક્ષુભિઃ ॥ ૪૭૫॥

સ્મર્તવ્યશ્ચ પ્રયત્નેન ધ્યાતવ્યશ્ચ મહેશ્વરઃ ।
ધ્યાનેન તપસા યજ્ઞૈઃ પૂજયા ચ મુહુર્મુહુઃ ॥ ૪૭૬॥

પ્રીણનીયો મહાદેવઃ સર્વદા મુક્તિકાઙ્ક્ષિભિઃ ।
ઉદ્ધૂલયધ્વમઙ્ગાનિ ભસ્મના પ્રતિવાસરમ્ ॥ ૪૭૭॥

ભૂષયધ્વં શરીરાણિ રુદ્રાક્ષૈઃ શ્રુતિચોદિતૈઃ ।
શિરોલલાટસ્થાનાનિ સિતભસ્મત્રિપુણ્ડ્રકૈઃ ॥ ૪૭૮॥

પાવયિત્વા પ્રયત્નેન પૂજયધ્વં મહેશ્વરમ્ ।
જપધ્વમતિયત્નેન રુદ્રાધ્યાયં મુહુર્મુહુઃ ॥ ૪૭૯॥

શ્રીરુદ્રાધ્યાયમધ્યસ્થં ધ્યાતં વેદૈઃ સ્તુતં સદા ।
મન્ત્રં "નમઃ શિવાયે"તિ જપધ્વં વિધિપૂર્વકમ્ ॥ ૪૮૦॥

સ મન્ત્રરાજઃ સર્વેષાં મન્ત્રાણામધિપો દ્વિજાઃ ।
નાસ્તિ તત્સદૃશો મન્ત્રો મન્ત્રેષુ વિવિધેષ્વપિ ॥ ૪૮૧॥

વેદવેદાન્તસંવેદ્યઃ સર્વમન્ત્રોત્તમોત્તમઃ ।
પઞ્ચાક્ષરઃ સ વેદેઽયઃ સ તુ મન્ત્રશિરોમણિઃ ॥ ૪૮૨॥

મોક્ષો ભવતિ વિપ્રેન્દ્રસ્તજ્જપેનૈવ નાન્યથા ।
પઞ્ચાક્ષરં મન્ત્રરાજં મહાદેવાત્મકં દ્વિજાઃ ॥ ૪૮૩॥

યો જપેદતિયત્નેન મુક્તિસ્તસ્યૈવ જાયતે ।
પઞ્ચાક્ષરજપાસક્તઃ પઞ્ચાસ્યધ્યાનતત્પરઃ ॥ ૪૮૪॥

સર્વપ્રપઞ્ચનિર્મુક્તઃ પ્રપઞ્ચં નૈવ પશ્યતિ ।
પઞ્ચાક્ષરવિહીનાનાં મુક્તિર્નાસ્ત્યેવ સર્વથા ॥ ૪૮૫॥

પઞ્ચાક્ષરસ્ય માહાત્મ્યં ન વક્તું શક્નુયામહમ્ ।
મહેશઃ સર્વદેવેશઃ સર્વજ્ઞઃ પરમેશ્વરઃ ॥ ૪૮૬॥

જાનાતિ શિવમન્ત્રસ્ય માહાત્મ્યં નેતરો ધ્રુવમ્ ।
વેદાઃ સ્તુવન્તિ યે મન્ત્રં વેદાન્તાશ્ચ પ્રયત્નતઃ ॥ ૪૮૭॥

તસ્ય મન્ત્રસ્ય માહાત્મ્યં કો વા વેદ શિવં વિના ॥ ૪૮૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશં ૫ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। ૪૭૩-૪૮૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 473-488..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Ṛṣi Vasiśṭha ઋષિ વસિષ્ઠ et al) about worshiping Śiva શિવ with great effort through Rudrādhyāya japa રુદ્રાધ્યાય જપ and the ŚivaPañcākṣara Mantra શિવપઞ્ચાક્ષર મન્ત્ર viz., Namaḥ Śivāya નમઃ શિવાય, that indeed is the MantraRāja મન્ત્રરાજ and MantraŚiromaṇi મન્ત્રશિરોમણિ. He mentions about being adorned with Bhasma ભસ્મ, Rudrākṣa રુદ્રાક્ષ and Tripuṇḍra ત્રિપુણ્ડ્ર; and highlights that there is no relief from suffering or liberation from the bondage of material existence without worship of Śiva શિવ.

Proofread by Ruma Dewan

---

*Rishi Agastyaproktam Shivarchanopadesham 5*

pdf was typeset on June 21, 2024

Please send corrections to *sanskrit@cheerful.com*